कॄ—विक्षेपे । किरति । चकार चकरतुः चकरुः । चकरिथ चकरथुः चकर । चकार-चकर । चकरिव । चकरिम । करिता - करीता । करिष्यति-करीष्यति । किरतु. किर. किराणि. अकिरत्. अकिरः । अकिरम्. किरेत्. किरेः किरेयम् । कीर्यात् । अकारीत् । अकरिष्यत्-अकरीष्यत् ॥ कीर्यते । अकारि । कारयति । अचीकरत् । चिकरिषति-चिकरीषति-चिकीर्षति ॥ कीर्त्वा-अवकीर्य ॥

क्रदि—आह्वाने रोदनेच ॥ क्रन्दति. चक्रन्द. क्रन्दिता. क्रन्दिष्यति. क्रन्दतु. अक्रन्दत्. क्रन्देत्. क्रन्द्यात्. अक्रन्दीत्. अक्रन्दिष्यत् ॥ ॥ क्रन्द्यते. अक्रन्दि. क्रन्दयति । चिक्रन्दिषति । क्रन्दित्वा-आक्रन्द्य । क्रन्दितुम् ॥

क्रमु—पादविक्षेपे ॥ (उभयपदी.) क्रामति-क्राम्यति । (आ.)क्रमते-क्रम्यते । चक्राम - चक्रमे । क्रमिता. (आत्म.)क्रन्ता । क्रमिष्यति - क्रंस्यते । क्रामतु-क्राम्यतु । क्रमताम्-क्रम्यताम् । अक्रामत्-अक्राम्यत् । अक्रमत-अक्रम्यत । क्रामेत् - क्राम्येत । क्रमेत - क्रम्येत । क्रम्यात् - क्रंसीष्ट । अक्रमीत् अक्रंस्त । अक्रमिष्यत् - अक्रंस्यत । (कर्मणि) क्रम्यते । क्रमयति-ते । अचिक्रमत्-त । चिक्रमिषति - चिक्रंसते । क्रमितव्यम्-क्रमणीयम्. क्रान्तम्. क्रमित्वा - क्रान्त्वा - क्रन्त्वा - उपक्रम्य ।

acharya.org

क्रमितुम् ॥ (धातावस्मिन् अर्थभेदेन बहु वक्तव्यमस्ति । तदस्मदीये दिवाकरे ।)

क्रीञ्—द्रव्यविनिमये । (उभयपदी.) क्रीणाति क्रीणीतः क्रीणन्ति । (आ) क्रीणीते क्रीणाते क्रीणते । चिक्राय चिक्रियतुः चिक्रियुः । (आ.)चिक्रिये चिक्रियिरे । क्रेता । क्रेष्यति-ते । क्रीणातु-क्रीणीताम् । अक्रीणात्-अक्रीणीत । क्रीणीयात् क्रीणीयाताम् क्रीणीयुः ; क्रीणीत क्रीणीयाताम् क्रीणीरन् । (आशि) क्रीयात्-क्रेषीष्ट । अक्रैषीत् अक्रैष्टाम् अक्रैषुः । (आत्म.) अक्रेष्ट अक्रेषाताम् अक्रेषत । अक्रेष्यत् - अक्रेष्यत ॥ क्रीयते । क्रापयति-ते । अचिक्रपत् । चिक्रीषति-ते । क्रेतव्यम् क्रयणीयम् । क्रीतम् । क्रीत्वा-विक्रीय क्रेतुम् ॥

क्रीड— विहारे । क्रीडति. चिक्रीड. क्रीडिता. क्रीडिष्यति. क्रीडतु अक्रीडत् क्रीडेत्. क्रीड्यात्. अक्रीडीत्. अक्रीडिष्यत् । [विशेषोऽवधेयः ।] * क्रीडोऽनु संपरिभ्यश्चेति सूत्रेण (अनु. सं परि.) इत्युपसर्गयोगे आत्मनेपदम् । अनुक्रीडते. संक्रीडते. परिक्रीडते । (भावे) क्रीड्यते । अक्रीडि । क्रीडयति. अचिक्रीडत्. चिक्रीडिषति । क्रीडितव्यम् । क्रीडित्वा क्रीडितुम् ॥

क्रुध—क्रोधे ॥ क्रुध्यति । चुक्रोध । क्रोद्धा । क्रोत्स्यति । क्रुध्यतु । अक्रुध्यत् । क्रुध्येत् । क्रुध्यात् । अक्रुधत् । अक्रोत्स्यत् (भावे) क्रुध्यते । अक्रोधि । क्रोधयति । अचुक्रुधत् । चुक्रुत्सति । क्रुद्धः । क्रुद्ध्वा । क्रोद्धुम् ॥ [* क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप इति सूत्रेण 'शिष्याय क्रुध्यति' इति चतुर्थी । 'शिष्यमभिक्रुध्यति' ।

क्रुश—आह्वाने रोदने च ॥ क्रोशति । चुक्रोश । क्रोष्टा । क्रोक्ष्यति क्रोशतु । अक्रोशत् । क्रोशेत् । क्रुश्यात् । अक्रुक्षत् । अक्रोक्ष्यत् ॥ क्रुश्यते । अक्रोशि । क्रोशयति । अचुक्रुशत् । चुक्रुक्षति । क्रोष्टव्यम् । क्रुष्टः क्रुष्ट्वा । आक्रुश्य । क्रोष्टुम् ॥

acharya.org

क्लिश—उपतापे ॥ क्लिश्यते । चिक्लिशे । क्लेशिता । क्लेशिष्यते । क्लिश्यताम् । अक्लिश्यत । क्लिश्येत क्लेशिषीष्ट । अक्लेशिष्यत ॥ (भावे ।) क्लिश्यते । अक्लेशि । क्लेशयति । अचिक्लिशत् । चिक्लिशिषते - चिक्लेशिषते । क्लिष्टः—क्लिशितः । क्लिष्ट्वा - क्लिशित्वा - परिक्लिश्य । क्लेशितुम् ॥

क्षप—प्रेरणे ॥ क्षपयति । क्षपयांचकार - आस-बभूव । क्षपयिष्यति. (लुङ्) अचिक्षपत ॥ क्षप्यते । चिक्षपयिषति । क्षपितः क्षपयित्वा । क्षपयितुम् ॥

क्षमूष्—सहने ॥ (भ्वादौ क्षमते ; दिवादौ क्षाम्यति ।) क्षमते. चक्षमे. क्षमिता - क्षन्ता । क्षमिष्यते - क्षंस्यते । क्षमताम्. अक्षमत. क्षमेत. क्षमिषीष्ट - क्षंसीष्ट । अक्षमिष्ट - अक्षंस्त । अक्षमिष्यत - अक्षंस्यत ॥ क्षम्यते. अक्षमि. क्षमयति । अचिक्षमत् । चिक्षमिषते - चिक्षंसते । क्षन्तव्यम् । क्षान्तम् । क्षान्त्वा-क्षमित्वा । क्षमितुम् - क्षन्तुम् ॥

क्षमू—सहने. (दिवा.) क्षाम्यति. चक्षाम. क्षमिता-क्षन्ता. क्षाम्यतु. अक्षाम्यत्. क्षाम्येत्. क्षम्यात्. अक्षमत्. अक्षमिष्यत् - अक्षंस्यत् ॥ क्षम्यते । क्षमयति. अचिक्षमत. चिक्षमिषति - चिक्षंसति । क्षमितुम् - क्षन्तुम् ॥

क्षल—शौचे ॥ (उभयप.) क्षालयति-ते । क्षालयांचकार—क्षालयांबभूव । क्षालयिता-क्षालयिष्यति । अक्षालयत् । क्षालयेत् - क्षाल्यात्-क्षालयिषीष्ट । अचिक्षलत । अक्षालयिष्यत् ॥

क्षि—क्षये ॥ क्षयति. चिक्षाय. क्षेता. क्षयतु. क्षेष्यति. क्षयतु. अक्षयत. क्षयेत्. क्षीयात. अक्षैषीत. अक्षेष्यत् ॥ क्षीयते । क्षाययति । अचिक्षयत् । चिक्षीषति । क्षीणम्. क्षितम्. क्षित्वा. क्षेतुम् ॥ (अवधेयम् ; क्षिधातुः भ्वादौ स्वादौ तुदादौ च । भ्वादौ क्षयतीत्यादि गतम् । (स्वादौ) क्षि - हिंसायाम् । क्षिणोतीत्यादि । (तुदादौ) क्षि - निवासगत्योः ॥ क्षियतीत्यादि ॥

क्षिप—प्रेरणे क्षेपणे वा ॥ क्षिप्यति. चिक्षेप. क्षेप्ता. (लुङ्) अक्षैप्सीत.

acharya.org

अक्षैप्ताम् अक्षैप्सुः ॥ क्षिप्यते. अक्षेपि. क्षेपयति. अचिक्षिपत् ॥ चिक्षिप्सति. क्षिप्तः क्षिप्त्वा. क्षेप्तुम् ॥

क्षभ—संचलने ॥ [भ्वादौ तुदादौ क्र्यादौ च ।] भ्वादौ क्षोभते. चुक्षुभे. क्षोभिता. क्षोभिष्यते. (आशिषि) क्षोभिषीष्ट. (कर्मणि)क्षुभ्यते । अक्षोभि क्षोभयति - ते । अचुक्षुभत् - त. चुक्षोभिषते - चुक्षुभिषते । क्षुभितः । क्षुभित्वा क्षोभित्वा । क्षोभितुम् ॥

क्षुभ—संचलने ॥ (दिवादौ.) क्षुभ्यति. चुक्षोभ. क्षोभिता.

क्षुभ—संचलने. (क्र्यादौ) क्षुभ्नाति. चुक्षोभ. क्षोभिता.

खनु—अवदारणे ॥ (उभयपदी.) खनति-खनते । चखान-चख्ने. खनिता. खनिष्यति-ते । खनतु - खनताम्. अखनत्-अखनत. खनेत्-खनेत. (आशिषि) खायात् खन्यात् खनिषीष्ट. अखनीत् - अखानीत्- अखनिष्ट. अखनिष्यत् - अखनिष्यत ॥ (कर्मणि) खायते - खन्यते. अखानि खानयति - ते अचीखनत् - त. चिखनिषति - ते. खातः खनित्वा - खात्वा. खनितुम् ॥

खाद्—भक्षणे ॥ खादति. चखाद. खादिता. खादिष्यति. खादतु. अखादत्. खादेत्. खाद्यात्. अखादीत्. अखादिष्यत् ॥ खाद्यते. अखादि. खादयति. अचखादत्. चिखादिषति. खादितः खादित्वा खादितुम् ॥

खिद्—दैन्ये ॥ खिद्यते. चिखिदे. खेत्ता. अखित्त. (भावे) खिद्यते खेदयति अचीखिदत्. खिन्नः-खित्त्वा. खेत्तुम् ॥

ख्या—प्रकथने ॥ ख्याति । ख्यातु । अख्यात् । ख्यायात् ।

गण—संख्याने ॥ गणयति-ते । गणयांचकार-चक्रे । गणयिता । गणयिष्यति-ते । गणयतु-ताम् । अगणयत्-त । गणयेत्-त । गण्यात्-गणयिषीष्ट । अजगणत्-त । अजीगणत्-त । गण्यते । जिगणयिषति-ते । गणितः । गणयित्वा । गणयितुम् ॥

गद्—व्यक्तायां वाचि ॥ गदति । जगाद । गदिता । गदिष्यति । गदतु । अगदत् । गदेत् । गद्यात् । अगदीत् - अगादीत् । अगदिष्यत् ॥ गद्यते । अगादि । गदयति । अजीगदत् । जिगदिषति । गद्यम् । गदितः । गदित्वा । गदितुम् ॥

गम्लृ—गतौ ॥ गच्छति । जगाम जग्मतुः जग्मुः । जगन्थ - जगमिथ । जग्मथुः । जग्म । जगाम - जगम । जग्मिव । जग्मिम । गन्ता । गमिष्यति । गच्छतु । अगच्छत् । गच्छेत् । गम्यात् । अगमत् । अगमिष्यत् ॥ गम्यते । अगामि । गमयति-ते । अजीगमत्-त । जिगमिषति । गन्तव्यम् । गतः गत्वा - आगत्य । गन्तुम् ॥ (अवधेयम् ।) * समो गम्यृच्छिभ्यामितिसूत्रेण अकर्मके आत्मनेपदम्- मैत्रश्चैत्रेण संगच्छते । ग्रामं संगच्छति ।

गर्ज—शब्दे । गर्जति. जगर्ज. गर्जिता. गर्जिष्यति. गर्जतु. अगर्जत्. गर्जेत्. गर्ज्यात्. अगर्जीत्. अगर्जिष्यत् ॥ गर्ज्यते. अगर्जि. गर्जयति-गर्जयते. जिगर्जिषति. गर्जित्वा. गर्जितुम् ॥

गर्ज—ध्वनौ । गर्जयति-ते. अजगर्जत्-त ॥

गर्ह—कुत्सायाम् । गर्हते. जगर्हे. गर्हिता. गर्हिष्यते. गर्हताम्. अगर्हत. गर्हेत. गर्हिषीष्ट. अगर्हिष्ट. अगर्हिष्यत ॥ गर्ह्यते. अगर्हि. गर्हयते. जिगर्हिषते. गर्हितुम्. गर्हित्वा ॥

गर्ह—निन्दने । (उभ) गर्हयति-ते. गर्हयाञ्चकार-चक्रे. गर्हयिता. गर्हयिष्यति - ते. गर्ह्यात्. गर्हयिषीष्ट. अजगर्हत् - त. अगर्हयिष्यत् - त । गर्ह्यते । गर्हयित्वा. गर्हयितुम् ॥

गाहू—विलोडने । गाहते. जगाहे-जगाहिषे-जगाक्षे-जगाहे; गाहिता-गाढा. गाहिष्यते-घाक्ष्यते. गाहताम्. अगाहत. गाहेत. गाहिषीष्ट-घाक्षीष्ट. अगाढ-अगाहिष्ट. अगाहिष्यत-अघाक्ष्यत. गाहयति-ते. जिघाक्षते- जिगाहिषते. गाहित्वा-गाढ्वा. गाहितुम्-गाढुम् ॥

acharya.org

गुपू—रक्षणे । गोपायति. गोपायाञ्चकार-जुगोप; गोपायांचकर्थ-जुगोपिथ-जुगोप्थ; गोपायाञ्चकृव-जुगुपिव, जुगुप्व. गोपायिता-गोपिता-गोप्ता. गोपायिष्यति-गोपिष्यति-गोप्स्यति. गोपायतु. अगोपायत्. गोपायेत्. गोपाय्यात्-गुप्यात्. अगोपायीत्-अगोपीत्-अगौप्सीत्; अगोपायिष्टाम्-अगोपिष्टाम् - अगोप्ताम्. अगोपायिष्यत् - अगोपिष्यत् - अगोप्स्यत् । गोपाय्यते, गुप्यते. अगोपायि. अगोपि. गोपाययति-ते-गोपयति-ते. जुगोपयिषति-जुगोपिषति-जुगुप्सति-जुगुपिषति. गोपायित्वा-गोपित्वा-गुप्त्वा-गुपित्वा. गोपायितुम्-गोपितुम्-गोप्तुम्. सङ्गोपाय्य. सङ्गुप्य ॥

गुप—निन्दायाम् । नित्यं सन्नन्तः, नित्यमात्मनेपदम् । जुगुप्सते. जुगुप्साञ्चक्रे—बभूव-आस. जुगुप्सिता. जुगुप्सिष्यते. जुगुप्सताम्. अजुगुप्सत. जुगुप्सेत. जुगुप्सिषीष्ट. अजुगुप्सिष्ट. अजुगुप्सिष्यत. जुगुप्स्यते. जुगुप्सयते. जुगुप्सित्वा. जुगुप्सितुम् ॥

गुप—गोपने । गोपयति - गोपयते गोपयाञ्चक्रे - चकार - आस - बभूव. गोपयिता, गोपयितासि - से. गोपयिष्यति-ते गोपयतु - तात, गोपयताम्. अगोपयत-त. गोपयेत-त. गोप्यात् - गोपयिषीष्ट. अजूगुपत-त. अगोपयिष्यत् - त । गोप्यते, गुप्यते. जुगोपयिषति - ते. गोपयित्वा. गोपयितुम् ॥

गुम्फ—ग्रन्थे । गुम्फति. जुगुम्फ. गुम्फिता. अगुम्फीत । गुम्फ्यते. अगुम्फि. गुम्फयति. गुम्फित्वा, गुफित्वा. गुम्फितुम ॥

गुहू—संवरणे (उभयपदी) । गूहति-ते. जुगूह-जुगुहे, जुगूहतुः-जुगुहाते, जुगूहुः-जुगुहिरे; जुगूहिथ-जुगोढ-जुगुहिषे-जुघुक्षे, जुगूहथुः जुगुहाथे, जुगूह-जुगुहिध्वे, जुघुध्वे जुगूह-जुगुहे, जुगूहिव-जुगुह्व - जुगुहिवहे-जुगुह्वहे, जुगूहिम - जुगूह्म - जुगुहिमहे - जुगुह्महे. गूहिता - गोढा. गूहिष्यति-घोक्ष्यति-गूहिष्यते - घोक्ष्यते. गूहतु गूहताम्. अगूहत-त्. गूहेत - त्. गुह्यात् - गूहिषीष्ट-घुक्षीष्ट. अगूहिष्ट - अगूढ - अघुक्षत-

अगूहीत - अघुक्षत. अगूहिष्यत - अघोक्ष्यत । गुह्यते. अगूहि. गूहयति-ते. जुघुक्षति ते. गुहित्वा-गूहित्वा-गूढ्वा. गूहितुम्-गोढुम् ॥

गृज—शब्दे । गर्जति. जगर्ज. गर्जिता. गर्जिष्यति. गर्जतु. अगर्जत्. गर्जेत्. गर्ज्यात्. अगर्जीत्. अगर्जिष्यत् । गर्जयति-ते. जिगर्जिषति. गर्जित्वा. गर्जितुम् ॥

गृह—ग्रहणे । गृहयते. गृहयाञ्चक्रे. अजगृहत ।

गॄ—शब्दे । गृणाति. जगार. गरिता - गरीता गरिष्यति - गरीष्यति. गृणातु-गृणीतात्. अगृणात. गृणीयात. गीर्यात. अगारीत्. अगरिष्यत् - अगरीष्यत् । गीर्यते. अगारि. गारयति. जिगरिषति ॥ (निगीर्य). गरितुम्-गरीतुम् ॥

गै—शब्दे । गायति. जगौ. गाता. गास्यति. गायतु. अगायत्. गायेत गेयात्. अगासीत्. अगास्यत् । गीयते. अगायि. गापयति-ते. जिगासति. गीत्वा. सङ्गीय. विगायति. विगीयते. गातुम् ॥

ग्रन्थ—सन्दर्भे । ग्रथ्नाति - ग्रथ्नीतः - ग्रथ्नन्ति. जग्रन्थ - जग्रन्थतुः, जग्रथतुः-जग्रन्थुः, जग्रथुः ; जग्रन्थिथ-जग्रन्थथुः, जग्रथथुः-जग्रन्थ; जग्रथ-जग्रन्थ-जग्रन्थिव-जग्रथिव-जग्रन्थिम, जग्रथिम. ग्रन्थिता, ग्रन्थिष्यति. ग्रथ्नातु-ग्रथ्नीताम्. ग्रथ्नन्तु; ग्रथान-ग्रथ्नीतम्-ग्रथ्नीत; ग्रथ्नानि ग्रथ्नाव-ग्रथ्नाम. अग्रथ्नात् - अग्रथ्नीताम् - अग्रथ्नन् ; अग्रथ्नाः-अग्रथ्नीतम्-अग्रथ्नीत; अग्रथ्नाम्. अग्रथ्नीव-अग्रथ्नीम. ग्रथ्नीयात्-ग्रथ्नीयाताम्-ग्रथ्नीयुः; ग्रथ्नीयाः-ग्रथ्नीयातम्-ग्रथ्नीयात; ग्रथ्नीयाम्-ग्रथ्नीयाव ग्रथ्नीयाम. ग्रथ्यात्. अग्रन्थीत्. अग्रन्थिष्यत् । ग्रथ्यते. अग्रन्थि-ग्रन्थयति. जिग्रन्थिषति. ग्रथित्वा-ग्रन्थित्वा. ग्रन्थितुम् ॥

ग्रन्थ—बन्धने । ग्रन्थयति-ते. अजग्रन्थत-त ॥

ग्रसु—अदने । ग्रसते. जग्रसे. ग्रसिता. ग्रसिष्यते. ग्रसताम्. अग्रसत. ग्रसेत.

acharya.org

ग्रसिषीष्ट. अग्रसिष्ट. अग्रसिष्यत । ग्रस्यते. अग्रासि. ग्रासयति. जिग्रसिषते. ग्रसित्वा-ग्रस्त्वा. ग्रसितुम् ।

ग्रस—ग्रहणे । ग्रासयति-ते । अजिग्रसत्-त । ग्रासयित्वा ।

ग्रह—उपादाने । (उभय) गृह्णाति-गृह्णीतः-गृह्णन्ति; गृह्णीते-गृह्णाते-गृह्णते, गृह्णीषे-गृह्णाथे-गृह्णीध्वे, गृह्णे-गृह्णीवहे-गृह्णीमहे. जग्राह-जगृहतुः-जगृहुः; जगृहे-जगृहाते-जगृहिरे. ग्रहीता. ग्रहीष्यति-ते. गृह्णातु गृह्णीताम्-गृह्णन्तु ; गृह्णीताम्-गृह्णाताम्-गृह्णताम् , गृह्णीष्व-गृह्णाथाम्-गृह्णीध्वम् , गृह्णै-गृह्णावहै - गृह्णामहै. अगृह्णात - अगृह्णीत. गृह्णीयात् - गृह्णीत. गृह्यात् - ग्रहीषीष्ट. अग्रहीत् - अग्रहीष्ट. अग्रहीष्यत्-त । गृह्यते. अग्राहि ग्राहयति-ते. जिघृक्षति-ते. गृहीत्वा. संगृह्य. ग्रहीतुम् ॥

ग्लै—हर्षक्षये । ग्लायति. जग्लौ-जग्लतुः-जग्लुः; जग्लाथ, जग्लिथ-जग्लथुः-जग्ल; जग्लौ-जग्लिव-जग्लिम. ग्लाता. ग्लास्यति. ग्लायतु. अग्लायत्. ग्लायेत्. ग्लायात् - ग्लेयात्. अग्लासीत्. अग्लास्यत् । ग्लायते. ग्लपयति--ते, ग्लपयति-ते. जिग्लासति. ग्लात्वा, प्रग्लाय, सङ्ग्लाय.

घट—चेष्टायाम् । घटते. जघटे. घटिता-घटितासे. घटिष्यते. घटताम्. अघटत. घटेत. घटिषीष्ट. अघटिष्ट. अघटिष्यत । घट्यते. अघटि. घटयति - ते. जिघटिषति. घटित्वा - सङ्घट्य. घटितुम्. सङ्घटयति. विघटयति ॥

घट—सङ्घाते (उभय) । घाटयति-ते. घाटयाञ्चकार-चक्रे. घाटयिता; घाटयितासे. घाटयिष्यति-ते. घाटयतु-घाटयताम्. अघाटयत्-त. घाटयेत्-त. घाटयिषीष्ट. अजीघटत्-त. अघाटयिष्यत्-त.

घट्ट—चालने । घट्टयति-ते. घट्टयेत्-त. घट्टयतु-ताम्. अघट्टयत्-अघट्टयत. अजघट्टयत्-त । घट्टयते. घट्टयित्वा. घट्टयितुम् ॥

घुषिर्—विशब्दने । (उभय) । घोषयति-ते. घोषयाञ्चकार-चक्रे-आस-बभूव.

acharya.org

घोषयिता. घोषयिष्यति-ते. घुष्यात्-घोषयिषीष्ट. अजूघुषत्-त. अघोषयिष्यत्-त। घोष्यते. जुघुषयिषति-ते. घोषयितुम्. सङ्घोष्य. अवघुषितम् ॥

घूर्ण—भ्रमणे। घूर्णते. जुघूर्णे. घूर्णिता. घूर्णिष्यते. घूर्णताम्. अघूर्णत. घूर्णेत. घूर्णिषीष्ट. अघूर्णिष्ट. अघूर्णिष्यत घूर्णयते. जुघूर्णिषते.

घूर्ण—भ्रमणे। घूर्णति. जुघूर्ण. घूर्णिता. घूर्णिष्यति. घूर्णतु-घूर्णतात्. अघूर्णत्. घूर्णेत. घूर्ण्यात्. अघूर्णीत्. अघूर्णिष्यत्। घूर्ण्यते. घूर्णयति. जुघूर्णिषति.

घृषु—सङ्घर्षे. घर्षति. जघर्ष. घर्षिता. अघर्षीत्. घृष्यात्. घर्षिष्यति. अघर्षिष्यत्। घृष्यते. घर्षयति-ते. जिघर्षिषति. घर्षित्वा-घृष्ट्वा. घर्षितुम् ॥

घ्रा—गन्धोपादाने। जिघ्रति. जघ्रौ-जघ्रतुः-जघ्रुः; जघ्रिथ, जघ्राथ-जघ्रथुः-जघ्र; जघ्रौ-जघ्रिव-जघ्रिम. घ्राता. घ्रास्यति. जिघ्रतु. अजिघ्रत्. जिघ्रेत्. घ्रायात्-घ्रेयात्. अघ्रात्-अघ्रासीत्. अघ्रास्यत्। घ्रायते. घ्रापयति-ते. जिघ्रासति. घ्रात्वा-आघ्राय. घ्रातुम् ॥

चकासृ—दीप्तौ। चकास्ति. चकासांचकार, चकासामास, चकासाम्बभूव. चकासिता. चकासिष्यति. चकास्तु-चकास्ताम्-चकासतु; चकाधि-चकास्तम्-चकास्त; चकासानि-चकासाव-चकासाम. अचकात्, द्-अचकास्ताम्-अचकासुः; अचकाः, अचकाद्, त्-अचकास्तम्-अचकास्त. अचकासम्-अचकास्व-अचकास्म. चकास्यात्-चकास्याताम्-चकास्युः. चकास्यात्-चकास्यास्ताम्-चकास्यासुः. अचकासीत्-अचकासिष्यत. चकास्यते. चकासयति. चिचकासिषति. चकासित्वा-चकासितुम्. सञ्चकास्य.

चक्षिङ्—व्यक्तायां वाचि। अयं धातुः प्रायेण आङ्पूर्वः। चष्टे-चक्षाथे-चक्षते; चक्षे-चक्षाथे-चड्ढे; चक्षे-चक्ष्वहे-चक्ष्महे. चचक्षे,

acharya.org

चख्यौ, चख्ये, चक्शे ; चचक्षाते, चख्यतुः चख्याते, चक्शाते ; चचक्षिरे, चख्युः, चख्यिरे, चक्शिरे ; आचचक्षिषे, आचख्यित–आचख्याथ, चख्यिषे, चक्शिषे ; चचक्षाते, चख्यथुः, चख्याथे ; चक्शाथे ; चचक्षिध्वे, चख्य, चख्यिध्वे, चक्शिध्वे ; चचक्षे, चख्यौ, चख्ये, चक्शे ; चचक्षिवहे, चख्यिव, चख्यिवहे, चक्शिवहे, चचक्षिमहे, चख्यिम, चख्यिमहे, चक्शिमहे. ख्याता, क्शाता-ख्यातारौ-क्शातारौ - ख्यातारः, क्शातारः - ख्यातासि, ख्यातासे ; क्शातासि, क्शातासे ; ख्यातास्थः, ख्यातासाथे-क्शातास्थः, क्शातासाथे, ख्यातास्थ, ख्याताध्वे, क्शातास्थ, क्शाताध्वे-ख्यास्यति-ते, क्शास्यति - ते. चष्टां, चक्षाताम्, चक्षताम्; चक्ष्व, चक्षाथाम्, चध्वम्; चक्षै, चक्षावहै, चक्षामहै—अचष्ट, अचक्षाताम्, अचक्षत; अचष्ठाः, अचक्षाथाम्, अचध्वम्; अचक्षि, अचक्ष्वहि, अचक्ष्महि—चक्षीत, चक्षीयाताम्, चक्षीरन्; चक्षीथाः - चक्षीयाथाम् - चक्षीध्वम्; चक्षीय, चक्षीवहि, चक्षीमहि - ख्यायात्, ख्येयात्, ख्यासीष्ट; क्शायात्, क्शेयात्, क्शासीष्ट - अख्यत् - त, अख्यासीत्, अख्यास्त, अक्शासीत्, अक्शास्त - अख्यास्यत्, त, अक्शास्यत्-त । ख्यायते. ख्यापयति - ते, क्शापयति - ते. चिख्यासति - ते, चिक्शासति - ते ख्यात्वा. ख्यातुम्. ख्यातः. आख्येयम्. संख्याय. व्याख्याय' ॥

चमु—अदने । चमति, आचामति. चचाम, चेमतुः, चेमुः; चेमिथ - चचमिथ. चमिता. चमिष्यति. आचामतु. आचामत्. आचामेत्. अचमीत् । चम्यते चामयति. चिचमिषति. चान्त्वा, चमित्वा. चमितुम्. आचमनम्. आचम्य ॥

चर—गतिभक्षणयोः । चरति. चचार. चरिता. चरिष्यति. चर्यात. अचरीत्. अचरिष्यत् । चार्यते. चारयति. चिचरिषति. चरित्वा. चरितुम् । सञ्चारः, प्रचारः, सञ्चरति ॥

acharya.org

चर्च—अध्ययने । चर्चयति - ते. अचर्चत. अचर्चयिष्यत. अचिचर्चत्-त. चर्च्यते. चर्चयित्वा. चर्चयितुम् . चर्च्यः ॥

चर्व—भक्षणे । चर्वति. चर्वयति-ते. अचिचर्वत्-त. अचर्वीत् । चर्व्यते. चर्वयति - ते. चिचर्विषति. चर्वयित्वा, चर्वित्वा, सञ्चर्व्य. चर्वयितुम्, चर्वितुम् ॥

चल—कम्पने । चलति. चचाल - चेलतुः. चलिता. चलिष्यति. चलतु. अचलत्. चलेत्. चल्यात्. अचालीत् - अचालिष्टाम्. अचलिष्यत् । चल्यते. चाल्यम्. चलयति - ते. चिचलिषति. चलितुम् ॥

चष—भक्षणे (उभय) । चषति - ते. चचाष. चेषे. चषिता. चषिष्यति-ते. चषतु - ताम्. अचषीत् , अचषिष्ट.अचषिष्यत् - त. चष्यात्. चषिषीष्ट । चिचषिषति. चषित्वा. चषितुम् ॥

चिञ्—चयने (उभय) । चिनोति, चिनुते. चिकाय, चिचाय; चिकयिथ, चिकेथ; चिक्ये, चिच्ये. चेता; चेतासि, से. चेष्यति, ते. चिनोतु, चिनुतात् - चिनुताम् - चिन्वन्तु; चिनुताम् - चिन्वाताम् . चिन्वताम्. अचिनोत् - अचिनुत. चिनुयात् , चिन्वीत - चीयात् , चेषीष्ट. अचैषीत् - अचैष्टाम् - अचैषुः; अचेष्ट - अचेषाताम् - अचेषत. अचेष्यत् - त । चीयते. चापयति, चाययति. चिचीषति, ते; चिकीषति - ते. चित्वा. चेतुम्. उपचिनोति, अपचिनोति; उपचीयते, अपचीयते समुच्चिनोति ॥

चित—सञ्चेतने । चेतयते. चेतयाञ्चक्रे - आस-बभूव. चेतयिता. चेतयिष्यते. चेतयिषीष्ट. अचिचेतत - (अचीचितत). अचेतयिष्यत ।

चिति—स्मृत्याम् । चिन्तयति-ते. चिन्तयाञ्चकार - चक्रे - बभूव - आस. चिन्तयितासि-से. चिन्तयिष्यति-ते. चिन्तयतु-ताम. अचिन्तयत्-त. चिन्तयेत् - त. चिन्त्यात् - चिन्तयिषीष्ट. अचिचिन्तत् - त. अचिन्तयिष्यत् - त । चिन्त्यते. चिचिन्तयिषति, चिचिन्तिषति.

acharya.org

चिन्तयित्वा, चिन्तित्वा; विचिन्त्य, सञ्चिन्त्य, चिन्तयितुम्, चिन्तितुम् ॥

चिती—संज्ञाने । चेतति. चिचेत, चिचिततुः; चिचेथिथ, चिचितथुः; चिचेत, चिचितिव. चेतिता. चेतिष्यति. चेततु. अचेतत्. चेतेत्. चित्यात्. अचेतीत्; अचेतीः; अचेतिषम्. अचेतिष्यत् । चित्यते. चेतयति. चिचेतिषति. चेतित्वा, चेतितुम्. सञ्चिन्त्य.

चित्र—चित्रीकरणे । चित्रयति-ते. चित्रयिता. चित्रयाञ्चकार. अचिचित्रत्-त । चिचित्रयिषति. चित्रयित्वा.

चिह्न—लक्षणे । चिह्नयति-ते. अचिह्नत् ।

चुद—सञ्चोदने (प्रेरणे) । चोदयति-ते. चोदयाञ्चकार-चक्रे आस, बभूव. चोदयिता. चोदयिष्यति-ते. चोद्यात्-चोदयिषीष्ट. अचूचुदत्-त. अचोदयिष्यत्-त । चोदयितुम् ॥

चुबि—वक्त्रसंयोगे । चुम्बति. चुचुम्ब. चुम्बिता. चुम्बिष्यति. चुम्बतु. अचुम्बत्. चुम्बेत्. चुम्ब्यात्. अचुम्बीत्-अचुम्बिष्टाम्. अचुम्बिष्यत् । चुम्ब्यते. चुम्बयति. चुम्बित्वा. चुम्बितुम् ॥

चुर—स्तेये । चोरयति-ते. चोरयाञ्चक्रे-चकार-आस-बभूव. चोरयिता, चोरयितासि-से. चोरयिष्यति-ते. चोरयतु-तात्, चोरयताम्. अचोरयत्-त. चोरयेत्-त. चोर्यात्-चोरयिषीष्ट. अचूचुरत्-त. अचोरयिष्यत्-त । चोर्यते-चुर्यते. चुचोरयिषति-ते. चोरयित्वा. चोरयितुम् ॥

चूर्ण—पेषणे, सङ्कोचने च । चूर्णयति-ते. चूर्णयाञ्चकार-चक्रे-आस-बभूव. चूर्णयिता. चूर्णयिष्यति-ते. चूर्ण्यात्-चूर्णयिषीष्ट. अचुचूर्णत्-त. अचूर्णयिष्यत्-त । चूर्ण्यते. चूर्णयित्वा. चूर्णयितुम् ॥

चूष—पाने । चूषति. चुचोष-चुचूषतुः. चूषिता. चूषिष्यति. चूषतु. अचूषत्. चूषेत्. चूष्यात्. अचूषीत्. अचूषिष्यत् । चूषयति-ते. चुचूषिषति.

acharya.org

चेष्ट—चेष्टायाम् । चेष्टते. चिचेष्ट-चिचेष्टाते; चिचेष्टिषे. चेष्टिता. चेष्टिष्यते. चेष्टताम्. अचेष्टत. चेष्टेत. चेष्टिषीष्ट. अचेष्टिष्ट. अचेष्टिष्यत । चेष्ट्यते. चेष्टयति. चिचेष्टिषते. चेष्टित्वा. चेष्टितुम् ॥

च्यु—हसनसहनयोः । च्यावयति-ते. अचुच्यवत्-अचिच्यवत् ॥

च्युङ्—गतौ । च्यवते. चुच्युवे; चुच्युविषे. च्योता. च्योष्यते. च्यवताम्. अच्यवत. च्यवेत. च्योषीष्ट. अच्योष्ट. अच्योष्यत । च्यूयते. च्यावयति. चुच्यूषते. च्योतुम् ॥

च्युतिर् - क्षरणे । च्योतति. चुच्योत, चुच्युततुः ; चुच्योतिथ, चुच्युतथुः; चुच्योत, चुच्युतिव. च्योतिता. च्योतिष्यति. च्योततु. अच्योतत. च्योतेत, च्युत्यात् - च्युत्यास्ताम्. अच्युतत् - अच्युतताम् अच्युतन्. अच्योतीत् - अच्योतिष्टाम्. अच्योतिष्यत् । च्युत्यते. च्योतयति. चुच्योतिषति-चुच्युतिषति. च्योतित्वा, च्युतित्वा. च्योतितुम् ॥

छद - संवरणे । छादयति-ते; छदति-ते. छादयाञ्चकार-चक्रे-आस-बभूव; चच्छाद-चच्छदे. छादयिता; छदिता. छादयिष्यति ते; छदिष्यति-ते. छाद्यात्-छादयिषीष्ट; छद्यात् छदिषीष्ट. अचिच्छदत्-त; अच्छादीत्-अच्छदीत्-अच्छदिष्ट. अच्छादयिष्यत्-त । छाद्यते चिच्छादयिषति-ते. छादयित्वा. छादयितुम् ॥

छदिर्—ऊर्जने । छदति. अच्छदत्, अच्छादीत । छदयति-ते. चिछदिषति ॥

छिदिर्—द्वैधीकरणे । छिनत्ति-छिन्ते. चिच्छेद-चिच्छिदतुः; चिच्छेदिथ; चिच्छिदिव; चिच्छिदे, चिच्छिदिषे, चिच्छिदे. छेत्ता-सि-से. छेत्स्यति-ते. छिनत्तु, छिन्ताम्. अच्छिनत् - अच्छिन्त. छिन्द्यात् - छिन्दीत. छिद्यात्-छित्सीष्ट. अच्छिदत्-अच्छिदताम्. अच्छैत्सीत्-अच्छैत्ताम्. अच्छित्त - अच्छित्सातास्. अच्छेत्स्यत् - त । छिद्यते. छेदयति - ते. चिच्छित्सति-ते. छित्त्वा. छेत्तुम् ॥

छिद्र—भेदने । छिद्रयति-ते. अचिच्छिद्रत्-त । छिद्रयित्वा ॥

छेद—द्वैधीकरणे । छेदयति-ते. अचिच्छेदत्-त ॥

जक्ष—भक्षणहसनयोः । जक्षिति - जक्षितः—जक्षति ; जक्षिषि-जक्षिथः—जक्षिथ ; जक्षिमि—जक्षिवः—जक्षिमः. जजक्ष - जजक्षतुः ; जजक्षिथ—जजक्षथुः ; जजक्ष - जजक्षिव. जक्षिता. जक्षिष्यति. जक्षितु- तात्—जक्षिताम्- जक्षतु. जक्षिहि-जक्षितम्-जक्षित. जक्षाणि-जक्षाव-जक्षाम. अजक्षीत्; अजक्षत्—अजक्षिताम्—अजक्षुः ; अजक्षीः, अजक्षः - अजक्षितम्— अजक्षित ; अजक्षम्-अजक्षिव—अजक्षिम. जक्ष्यात्-जक्ष्याताम् - जक्ष्युः (आशी) जक्ष्यात् - जक्ष्यास्ताम् - जक्ष्यासुः अजक्षीत्. अजक्षिष्यत् । जक्ष्यते. जक्षयति. जिजक्षिषति. जक्षित्वा. जक्षितुम् ॥

जनी—प्रादुर्भावे । जायते. जज्ञे-जज्ञाते-जज्ञिरे ; जज्ञिषे-जज्ञाथे—जज्ञिध्वे ; जज्ञे—जज्ञिवहे जज्ञिमहे. जनिता. जनिष्यते. जायताम् ; जायस्व ; जायै. अजायत. जायेत. जनिषीष्ट. अजनि-अजनिष्ट - अजनिषाताम् अजनिषत ; अजनिष्ठाः - अजनिषाथाम् - अजनिढ्वम् ; अजनिषि- अजनिष्वहि - अजनिष्महि. अजनिष्यत । जायते, जन्यते. जनयति जिजनिषते. जनित्वा. जनितुम् ॥

जप—मानसे, व्यक्तायां वाचि । जपति. जजाप, जेपतुः. जपिता. जपिष्यति. जपतु. अजपत्. जपेत्. जप्यात् . अजपीत् अजापीत्. अजपिष्यत् । जप्यते. जापयति. जिजपिषति. जपित्वा- जपितुम् ॥

जल्प—व्यक्तायां वाचि । जल्पति. जजल्प. जल्पिता. जल्पिष्यति. जल्पतु. अजल्पत्. जल्पेत्. जल्प्यात्. अजल्पीत्. अजल्पिष्यत् । जल्प्यते. जल्पयति. जिजल्पिषति. जल्पितुम् ॥

जागृ—निद्राक्षये । जागर्ति - जागृतः - जाग्रति ; जागर्षि-जागृथः-जागृथ ; जागर्मि जागृवः - जागृमः, जागराञ्चकार, जजागार - जागराञ्चक्रतुः, जजागरतुः - जागराञ्चक्रुः, जजागरुः ; जागराञ्चकर्थ, जजागरिथ- जागराञ्चक्रथुः, जजागरथुः - जागराञ्चक्र, जजागर ; जागराञ्चकार-

चकर, जजागार, जजागर - जागराञ्चकृव, जजागरिव - जागराञ्चकृम, जजागरिम. जागरिता. जागरिष्यति. जागर्तु, जागृतात्. अजागः- अजागृताम् - अजागरुः ; अजागः ; अजागरम्. जागृयात्. जागर्यात्. अजागरीत्. अजागरिष्यत् । जागर्यते. जागरयति. जिजागरिषति. जागरित्वा. जागरितुम् ॥

जि-जये —जयति. जिगाय - जिग्यतुः - जिग्युः ; जिगयिथ, जिगेथ-जिग्यथुः- जिग्य ; जिगाय - जिग्यिव. जिग्यिम. जेता. जेष्यति. जयतु. अजयत्. जयेत्. जीयात्. अजैषीत् - अजैष्टाम् - अजैषुः ; अजैषीः ; अजैषम्. अजेष्यत् जीयते. अजायि. जाययति. जिगीषति. जित्वा. जेतुम्. विजित्य ॥

जि—अभिभवे । सर्वं जयतिवत् ॥

जीव—प्राणधारणे । जीवति. जिजीव. जीविता. जीविष्यति. जीवतु. अजीवत्. जीवेत्. जीव्यात्. अजीवीत्. अजीविष्यत् । जीव्यते, अजीवि. जीवयति. जिजीविषति. जीवित्वा, सञ्जीव्य, उपजीव्य, उपजीवितुम् ॥

जुषी—प्रीतिसेवनयोः । जुषते. जुजुषे. जोषिता. जोषिष्यते. जुषताम्. अजुषत. जुषेतः जोषिषीष्ट. अजोषिष्ट. अजोष्यत । जोषयति. जुजुषिषते. जुषित्वा. जोषित्वा ॥

जृभि—गात्रविनामे । जृम्भते. जजृम्भे. जृम्भिता. जृम्भिष्यते. जृम्भताम्. अजृम्भत. जृम्भेत. जृम्भिषीष्ट. अजृम्भिष्ट. अजृम्भिष्यत । जृम्भ्यते, अजृम्भि. जृम्भयति-ते. जिजृम्भिषते. जृम्भित्वा. जृम्भितुम् ॥

जृष्—वयोहानौ । जीर्यति. जजार-जजरतुः, जेरतुः-जजरुः, जेरुः; जजरिथ, जेरिथ-जजरथुः,जेरथुः-जजर, जेर; जजार, जजर - जजरिव, जेरिव- जजरिम, जेरिम. जरिता, जरीता. जरिष्यति, जरीष्यति. जीर्यतु. अजीर्यत्. जीर्येत्. जीर्यात्. अजारीत्, अजरत्. अजरिष्यत्, अज-

शीर्ष्यत् । जीर्यते, अजारि. जरयति. जिजीर्षति-जिजरिषति-जिजरीषति. जरित्वा, जरीत्वा; सञ्जार्य, सञ्जीर्य. जरितुम्, जरीतुम् ॥

ज्ञप —ज्ञाने ज्ञापने च । ज्ञपयति-ते. अजिज्ञपत्-त । संज्ञापयति. निज्ञपयति-प्रज्ञपयति. जिज्ञपयिषति ।

ज्ञा—अवबोधने । जानाति - जानीतः-जानन्ति; जानासि · जानीथः-जानीथ; जानामि-जानीवः-जानीमः. जज्ञौ-जज्ञतुः-जज्ञुः; जज्ञिथ, जज्ञाथ-जज्ञथुः-जज्ञ; जज्ञौ-जज्ञिव-जज्ञिम. ज्ञाता. ज्ञास्यति. जानातु, जानीतात् - जानीताम् - जानन्तु; जानीहि, जानीतात् - जानीतम् - जानीत; जानानि-जानाव-जानाम. अजानात्-अजानीताम्-अजानन्; अजानाः-अजानीतम्-अजानीत; अजानाम्-अजानीव-अजानीम. जानीयात्-जानीयाताम्-जानीयुः; जानीयाः-जानीयातम्-जानीयात; जानीयाम्-जानीयाव-जानीयाम. ज्ञायात् - ज्ञेयात्; ज्ञायाः, ज्ञेयाः; ज्ञायासम्, ज्ञेयासम्. अज्ञासीत्. अज्ञास्यत् । ज्ञायते; अज्ञायि· ज्ञापयति. जिज्ञासते. प्रतिजानीते. अपजानीते. सञ्जानीते. ज्ञात्वा. संज्ञाय ज्ञातुम् ॥

ज्ञा—नियोगे । प्रायेणायमाङ्पूर्वः । ज्ञापयति - ते. आज्ञापयाञ्चकार - चक्रे. ज्ञापयिता. ज्ञापयिष्यति-ते. ज्ञापयतु-ताम्. अज्ञापयत्-त. ज्ञापयेत्-त. ज्ञाप्यात् ज्ञापयिषीष्ट. अजिज्ञपत्-त. अज्ञापयिष्यत्-त । ज्ञाप्यते; अज्ञापि. अजिज्ञपत्. जिज्ञपयिषति-ते. ज्ञीप्सति-ते. ज्ञापयित्वा. आज्ञाप्य. ज्ञापयितुम् ॥

ज्वर —रोगे । ज्वरति. जज्वार. ज्वरिता. ज्वरिष्यति. ज्वरतु. अज्वरत्. ज्वरेत्. ज्वर्यात्. अज्वारीत्. अज्वरिष्यत् । ज्वर्यते; अज्वारि. ज्वारयति. जिज्वरिषति. ज्वरित्वा. ज्वरितुम् ॥

ज्वल—दीप्तौ । ज्वलति. जज्वाल; जज्वलिथ; जज्वाल. ज्वलिता. ज्वलिष्यति. ज्वलतु. अज्वलत्. ज्वल्यात्. अज्वालीत्. अज्वलिष्यत् । ज्वल्यते;

acharya.org

अज्वालि. ज्वलयति, ज्वालयति. प्रज्वलयति. जिज्वलिषति. ज्वलित्वा. सञ्ज्वल्य. ज्वलितुम् ॥

टीकृ—गतौ । टीकते. टिटीके. टीकिता. टीकिष्यते. टीकताम्. अटीकत. टीकेत. टीकिषीष्ट. अटीकिष्ट. अटीकिष्यत. अटिटीकत ।

डीङ्—विहायसगतौ । डयते. डिड्ये. डयिता. डयिष्यते. डयताम्. अडयत. डयेत. डयिषीष्ट. अडयिष्ट; अडयिषाताम्. अडयिष्यत । डीयते; अडायि. डाययति; अडीडयत्. डिडयिषते. डयित्वा; उड्डीय; सण्डीय. डयितुम्.

डीङ्—विहायसगतौ । डीयते. डिड्ये. डयिता. डयिष्यते. डीयताम्. अडीयत. डीयेत. डयिषीष्ट. अडयिष्ट. अडयिष्यत ॥

ढौकृ गतौ । ढौकते. डुढौके. ढौकिता. ढौकिष्यते. ढौकताम्-अढौकत. ढौकेत. ढौकयिषीष्ट. अढौकिष्ट. अढौकिष्यत । ढौक्यते; अढौकि. ढौकयति-ते; अडुढौकत्-त. ढौकित्वा, सण्ढौक्य. ढौकितुम् ॥

णट—नृत्तौ । नटति. ननाट-नेटतुः-नेटुः; नेटिथ-नेटथुः-नेट; ननाट, ननट-नेटिव-नेटिम. नटिता. नटिष्यति. नटतु. अनटत्. नटेत्. नट्यात्. अनाटीत्, अनटीत्. अनटिष्यत् ।

णद—अव्यक्ते शब्दे । नदति. ननाद. नदिता. नदिष्यति. नदतु-तात्; नदनदतात्. अनदत्. नदेत्. नद्यात् अनादीत्, अनदीत् अनादिष्टाम्, अनदिष्टाम् - अनादिषुः, अनदिषुः; अनादीः, अनदीः - अनादिष्टम्, अनदिष्टम् - अनादिष्ट, अनदिष्ट; अनादिषम्, अनदिषम् - अनादिष्व, अनदिष्व - अनादिष्म, अनदिष्म. अनदिष्यत् । नद्यते; अनादि. प्रणदति. नादयति; अनीनदत्. निनदिषति; अनिनदिषीति. नदित्वा.

णद—भाषायाम् । नादयति - ते. अनीनदत - त ॥

णम्—प्रह्वत्वे शब्दे । नमति. ननाम; नेमिथ, ननन्थ. नन्ता. नंस्यति.

नमतु. अनमत. नमेत. नम्यात्. अनंसीत. अनंस्यत । नम्यते; अनामि. नमयति - ते. निनंसति. प्रणमति. नत्वा; प्रणत्य, प्रणम्य. नन्तुम् ॥

णश—अदर्शने । नश्यति. ननाश-नेशतुः - नेशुः; नेशिथ, ननंष्ठ - नेशथुः- नेश; ननाश, ननश - नेशिव, नेश्व - नेशिम, नेश्म. नशिता, नंष्टा. नशिष्यति, नंक्ष्यति. नश्यतु. अनशत् अनशताम् अनशिष्यत अनंक्ष्यत ॥ प्रणश्यति. निनशिषति, निनंक्षति. नाशयति - अनीनशत् ॥

णह—बन्धने । नह्यति - ते. ननाह - नेहतुः - नेहुः; नेहिथ - ननद्ध; ननाह, ननह - नेहिव: नेहे. नद्धा नत्स्यति, नत्स्यते नह्यतु-ताम्. अनह्यत् त. नह्येत् त नह्यात्, नत्सीष्ट अनात्सीत् - अनाद्धाम् - अनात्सीत् - अनाद्धाम् - अनात्सुः अनद्ध—अनत्साताम् - अनत्सत अनत्स्यत्–त । नाहयति - अनीनहत् निनत्सति - ते नह्यः, नाह्यः । प्रणह्यते विनह्यते

णिजिर्—शौचपोषणयोः । नेनेक्ति-नेनिक्तः-नेनिजति ; नेनेक्षि-नेनिक्थः- नेनिक्थ ; नेनेज्मि. निनेज ; निनेजिथ ; निनेज. नेक्ता नेक्ष्यति नेनेक्तु, नेनिक्तात्-नेनिक्ताम् नेनिजतु ; नेनेग्धि, नेनिक्तात् नेनिक्तम्- नेनिक्त ; नेनिजानि नेनेजाव-नेनेजाम. अनेनेक् - ग् - अनेनिक्ताम्- अनेनिजुः ; अनेनेक् - ग् – अनेनिक्ताम्. अनेनिजुः अनेनेक् ग्. अनेनिक्तम् - अनेनिक्त अनेनेजम् - अनेनिज्व अनेनिज्म. नेनिज्यात्. निज्यात्. अनिजत् ; अनैक्षीत् - अनिजताम् अनैक्ताम् - अनिजन् ; अनैक्षुः; अनिजः; अनैक्षीः, - अनिजतम् अनैक्तम्, अनिजत. अनैक्त ; अनिजम्, अनैक्षम् अनिजाव, अनैक्ष्व अनिजाम अनैक्ष्म. अनेक्ष्यत । (आत्मने) नेनिक्ते. निनिजे. नेक्ष्यते. नेनिजीत. निक्षीष्ट. अनिक्त । निक्त्वा. निर्णेजकः. अवनेजनम्.

acharya.org

णिदि—कुत्सायाम् । निन्दति. निनिन्द. निन्दिता. निन्दिष्यति. निन्दतु. अनिन्दत. निन्देत्, निन्द्यात्. अनिन्दीत. अनिन्दिष्यत् । निन्दयति-ते. निनिन्दिषति. निन्द्यते - अनिन्दि. प्रणिन्दति. निन्दित्वा, विनिन्द्य. निन्दितुम् ॥

णीञ्—प्रापणे । नयति-ते. निनाय - निन्यतुः - निन्युः ; निनयिथ, निनेथ- निन्यथुः - निन्य ; निनाय, निनय निन्यिव - निन्यिम. निन्ये. नेता, नेतासि-से. नेष्यति-ते. नयतु-ताम्. अनयत्-त. नयेत्-त. नीयात् ; नेषीष्ट. अनैषीत् - अनैष्टाम्. अनेष्ट - अनेषाताम् - अनेषत ; अनेष्ठाः - अनेषाथाम् - अनेढ्वम् ; अनेषि - अनेष्वहि - अनेष्महि- अनेष्यत् - त । नाय्यते. नाययति - ते. निनीषति. नीत्वा. प्रणीय, आनीय, अपनीय, समानीय, परिणीय, निर्णीय. नेतुम् उन्नयनम्, उपनयनम्.

णु—स्तुतौ । नौति - नुतः - नुवन्ति ; नौषि - नुथः - नुथ ; नौमि - नुवः- नुमः. नुनाव - नुनुवतुः ; नुनाव, नुनव. नविता. नविष्यति. नौतु- नुतात्; नुहि - नुतात्; नवानि. अनौत् - अनुताम् - अनुवन ; अनौः-अनुतम् - अनुत ; अनवम् - अनुव - अनुमः नुयात्-नुयाताम्. नूयात् - नूयास्ताम्. अनावीत्. अनविष्यत् । नावयति ; अनूनवत्. नुनूषति, नुनावयिषति ।

णुद—प्रेरणे । नुदति - ते. नुनोद - नुनुदतुः, नुनुदे - नुनुदाते. नोत्ता ; नोत्तासि - से. नोत्स्यति - ते. नुदतु - ताम्. अनुदत् - त. नुदेत्-त. नुद्यात् - नुत्सीष्ट. अनौत्सीत् अनौत्ताम्. अनुत्त - अनुत्साताम्. अनोत्स्यत्—त । प्रणुदति—ते. नोदयति. नुनुत्सति - ते. नुत्त्वा.

तक्ष—त्वचने । तक्षति. ततक्ष. तक्षिता । तक्षयति - ते. तितक्षिषति.

तक्षू - तनूकरणे । तक्षति ; तक्ष्णोति - तक्ष्णुतः - तक्ष्णुवन्ति, ततक्ष ; ततक्षिथ - ततष्ठ ; ततक्ष्व, ततक्षिव - ततक्ष्म. ततक्ष्म. तक्षिता,

तष्टा. तक्षिष्यति, तक्ष्यति. तक्षतु - तक्षतात्. अतक्षत. तक्षेत्. तक्ष्यात्. अतक्षीत - अतक्षिष्टाम्; अताक्षीत् - अताष्टाम् - अताक्षुः. अतक्षिष्यत्, अतक्ष्यत्। तक्ष्यते - अतक्षि. तक्षयति - अततक्षत्. तितक्षिषति. तक्षित्वा. तष्ट्वा. तक्षितुम्-तष्टुम्.

तड—आघाते। ताडयति-ते. ताडयाञ्चकार-चक्रे. ताडयिता; ताडयितासि-से. ताडयिष्यति ते. ताडयतु-ताम्. अताडयत्-त. ताडयेत् त. ताड्यात्-ताडयिषीष्ट. अतीतडत्-त. अताडयिष्यत्-त। ताड्यते; अताडि. ताडयित्वा, सन्ताड्य. ताडयितुम्॥

तनु—विस्तारे। तनोति-तनुतः-तन्वन्ति; तनोषि-तनुथः-तनुथ; तनोमि-तनुवः, तन्वः-तनुमः, तन्मः. तनुते-तन्वाते-तन्वते; तनुषे-तन्वाथे-तनुध्वे; तन्वे-तनुवहे, तन्वहे-तनुमहे, तन्महे. ततान-तेनतुः-तेनुः; तेनिथ - तेनथुः-तेन; ततान, ततन - तेनिव - तेनिम. तेने. तनिता-तनिता-सि-से. तनिष्यति-ते. तनोतु, तनुतात्; तनु, तनुतात्-तनुताम्-तन्वाताम् - तन्वताम्; तनुष्व-तन्वाथाम् - तनुध्वम्; तनवै. तनवावहै - तनवामहै - अतनोत् - अतनुताम् - अतन्वन्; अतनोः - अतनुतम्-अतनुत; अतनवम्-अतनुव, अतन्व - अतनुम, अतन्म. अतनुत-अतन्वाताम् - अतन्वत; अतनुथाः - अतन्वाथाम् - अतनुध्वम्; अतन्वि-अतनुवहि, अतन्वहि-अतनुमहि, अतन्महि. तनुयात्-तनुयाताम्-तनुयुः. तन्वीत-तन्वीयाताम्-तन्वीरन्. तन्यात्-तन्यास्ताम्-तन्यासुः. तनिषीष्ट-तनिषीयास्ताम्-तनिषीरन्. अतानीत्, अतनीत्-अतानिष्टाम, अतनिष्टाम्-अतानिषुः, अतनिषुः. अतत, अतनिष्ट-अतनिषाताम्-अतनिषत; अतथाः, अतनिष्ठाः-अतनिषाथाम्, अतनिढ्वम्, ध्वम्; अतनिषि-अतनिष्वहि-अतनिष्महि. अतनिष्यत्-त। तन्यते; अतानि तानयति; अतीतनत्. तितनिषति ते; तितांसति-ते. तनित्वा, तत्वा; अवतन्य, अवतत्य. तनितुम्॥

acharya.org

तप—सन्तापे । तपति. तताप-तेपतुः-तेपुः; तेपिथ, ततप्थ-तेपथुः-तेप; तताप, ततप-तेपिव-तेपिम. तप्ता. अतप्स्यत्. तपतु. अतपत्. तपेत्. तप्यात्. अताप्सीत्, अताप्ताम्, अताप्सुः. अतप्स्यत । तप्यते; अतापि. तापयति. तितप्सति. तप्त्वा. तप्तुम् ॥

तप—ऐश्वर्ये । तप्यते; तेपे; तेपिषे. तप्ता; तप्तासे. तप्स्यते. तप्यताम्. अतप्यत. तप्येत. तप्सीष्ट. अतप्त, अतप्साताम्. अतप्स्यत । तप्यते. तापयति. तितप्सते. तप्त्वा. तप्तुम् ॥

तप—दाहे-उभयपदी । तापयति-ते. तापयाञ्चकार-चक्रे. तप्ता. तप्स्यति-ते. अतीतपत्-त.

तमु—काङ्क्षायाम् । ताम्यति. ततम-तेमतुः. तमिता. तमिष्यति. ताम्यतु. अताम्यत्. ताम्येत्. तम्यात्. अतमत्-अतमताम्. अतमिष्यत् । तमयति. तितमिषति. तमित्वा, तान्त्वा.

तर्क-दीप्तौ भाषार्थे च । तर्कयति-ते. तर्कयाञ्चकार-चक्रे. तर्कयिता, तर्कयिष्यति-ते. अततर्कत्-त । तर्क्यते; अतर्कि. तर्कयित्वा. सन्तर्क्य. तर्कयितुम् ॥

तर्ज—भर्त्सने । तर्जति. ततर्ज. तर्जिता. तर्जिष्यति. तर्जतु. अतर्जत्. तर्जेत्. तर्ज्यात्. अतर्जीत्-अतर्जिष्टाम् अतर्जिष्यत् । तर्ज्यते. तर्जयति. तितर्जिषति. तर्जयित्वा, तर्जित्वा. सन्तर्ज्य. तर्जितुम्, तर्जयितुम्.

तर्ज—भर्त्सने । तर्जयते. तर्जयाञ्चक्रे. तर्जयिता-से. तर्जयिष्यते-तर्जयताम्. अतर्जयत. तर्जयेत. तर्जयिषीष्ट. अततर्जत. अतर्जयिष्यत ।

तसि—अलङ्कारे । (अव) तंसयति-ते. तंसयाञ्चकार-चक्रे तंसयिता. तंसयिष्यते । तितंसिषति, तितंसयिषति-ते. तंसयित्वा. अवतंस्य.

तिज—क्षमायाम् । नित्यं सन्नन्तः । तितिक्षते. तितिक्षाञ्चक्रे. तितिक्षिता. तितिक्षिष्यते. तितिक्षताम्. अतितिक्षत. तितिक्षेत. तितिक्षिषीष्ट.

acharya.org

अतितिक्षिष्ट. अतितिक्षिष्यत । तितिक्ष्यते तितिक्षयति. तितिक्षित्वा, सन्तितिक्ष्य. तितिक्षितुम् ॥

तिज—निशाने । तेजयति-ते तेजयाञ्चकार-चक्रे. तेजयिता तेजयिष्यति-ते. तेजयतु-ताम् अतेजयत्-त. तेजयेत्-ताम्. अतीतिजत्-त. तेज्यते ; अतेजि. उत्तेजयति. तेजयित्वा, सन्तेज्य. तेजयितुम् ॥

तुद – व्यथने । तुदति-ते. तुतोद-तुतुदतुः-तुतुदुः ; तुतोदिथ-तुतुदथुः-तुतुद ; तुतोद-तुतुदिव-तुतुदिम-तुतुदे-तुतुदाते-तुतुदिरे ; तुतुदिषे-तुतुदाथे-तुतुदिध्वे ; तुतुदे-तुतुदिवहे-तुतुदिमहे. तोत्ता, तोत्तासि-तोत्ता, तोत्तासे. तोत्स्यति-ते. तुदतु-ताम्. अतुदत्-त. तुदेत-त. तुद्यात्. तुत्सीष्ट. अतौत्सीत्-अतौत्ताम्-अतौत्सुः ; अतौत्सीः-अतौत्तम्-अतौत्त ; अतौत्सम्-अतौत्स्व-अतौत्स्म. अतुत्त-अतुत्साताम्-अतुत्सत ; अतुत्थाः-अतुत्साथाम्-अतुद्ध्वम् ; अतुत्सि-अतुत्स्वहि-अतुत्स्महि अतोत्स्यत्-त. तुद्यते-अतोदि. तोदयति-ते तुतुत्सति-ते. तुत्त्वा, प्रतुद्य ॥

तुष—तुष्टौ । तुष्यति. तुतोष ; तुतोषिथ. तोष्टा. तोक्ष्यति. तुष्यतु. अतुष्यत्. तुष्येत्. तुष्यात्. अतुषत्. अतोक्ष्यत् । तुष्यते ; अतोषि. तोषयति-ते. तुतुक्षति. तुष्ट्वा, सन्तुष्य. तोष्टुम् ॥

तृप—प्रीणने । तृप्यति. ततर्प-ततृपतुः-ततृपुः ; ततर्पिथ, ततर्प्थ, तत्रप्थ-ततृपथुः-ततृप ; ततर्प-ततृपिव-ततृपिम. तर्पिता, तर्प्ता, त्रप्ता. तर्पिष्यति, त्रप्स्यति, तर्प्स्यति. तृप्यतु. अतृप्यत्. तृप्येत्. तृप्यात्. अतृपत्, अतर्पीत्, अत्राप्सीत्, अतार्प्सीत्. अतर्पिष्यत्, अतर्प्स्यत्, अत्रप्स्यत् । तृप्यते ; अतर्पि. तर्पयति ; अततर्पत्, अतीतृपत्. तितर्पिषति-तितृप्सति. तर्पित्वा, तृप्त्वा, सन्तृप्य. तर्पितुम्, त्रप्तुम्, तर्प्तुम् ॥

तृप—तृप्तौ सन्दीपने च । तर्पयति-ते. अतीतृपत्, अततर्पत् ॥

acharya.org

(ञि)तृषा — पिपासायाम् । तृष्यति. ततर्ष - ततृषतुः - ततृषुः ; ततर्षिथ-ततृषथुः - ततृष ; ततर्ष - ततृषिम. तर्षिता. तर्षिष्यति. तृष्यतु: अतृष्यत्. तृष्येत्. तृष्यात्. अतृषत् अतृषताम्. अतर्षिष्यत् । तृष्यते ; अतर्षि. तर्षयति - ते. तितर्षिषति. तृषित्वा, तर्षित्वा, सन्तृष्य. तर्षितुम् ॥

तॄ — प्लवनतरणयोः । तरति. ततार - तेरतुः - तेरुः ; तेरिथ - तेरथुः-तेर; ततार-ततर - तेरिव - तेरिम. तरिता - तरीता. तरिष्यति - तरीष्यति. तरतु. अतरत्. तरेत्. तीर्यात् - तीर्यास्ताम्. अतारीत् - अतारिष्टाम्. अतरिष्यत्, अतरीष्यत् । तीर्यते ; अतारि. तारयति. तितीर्षति, तितरिषति-तितरीषति. तीर्त्वा. तरितुम् तरीतुम्—तर्तुम् ॥

त्यज — हानौ । त्यजति. तत्याज - तत्यजतुः - तत्यजुः ; तत्यजिथ, तत्यक्थ-तत्यजथुः—तत्यज ; तत्याज, तत्यज - तत्यजिव - तत्यजिम. त्यक्ता. त्यक्षति. त्यजतु. अत्यजत्. त्यजेत. त्यज्यात् - त्यज्यास्ताम्. अत्यक्षीत-अत्याक्ताम्-अत्याक्षुः ; अत्याक्षीः - अत्याक्तम् - अत्याक्त ; अत्याक्षम्-अत्याक्ष्व - अत्याक्ष्म. अत्यक्ष्यत । त्यज्यते - अत्याजि. त्याजयति. तित्यक्षति. त्यक्त्वा, सन्त्यज्य. त्यक्तुम् ॥

त्रपूष् — लज्जायाम् । त्रपते. त्रेपे - त्रेपाते - त्रेपिरे ; त्रेपिषे, त्रेप्से - त्रेपाथे-त्रेपिध्वे, त्रेप्ध्वे ; त्रेपे - त्रेपिवहे, त्रेप्वहे—त्रेपिमहे, त्रेप्महे. त्रपिता ; त्रप्ता. त्रपिष्यते, त्रप्स्यते त्रपताम्. अत्रपत. त्रपेत. त्रपिषीष्ट, त्रप्सीष्ट. अत्रपिष्ट-अत्रपिषाताम्. अत्रप्त-अत्रप्साताम्-अत्रप्सत; अत्रप्थाः-अत्रप्साथाम्-अत्रब्ध्वम ; अत्रप्सि - अत्रप्स्वहि - अत्रप्स्महि. अत्रपिष्यत, अत्रप्स्यत । त्रप्यते-अत्रापि. त्रपयति-ते, त्रापयति-ते. तित्रपिषते. तित्रप्स्यते. त्रपित्वा, त्रप्त्वा, सन्त्रप्य. त्रपितुम्, त्रप्तुम् ॥

त्रसी — उद्वेगे । त्रस्यति, त्रसति. तत्रास-तत्रसतुः, त्रेसतुः - तत्रसुः त्रेसुः; तत्रसिथ, त्रेसिथ - तत्रसथुः, त्रेसथुः - तत्रस-त्रेस; तत्रास, तत्रस-

acharya.org

तत्रसिव-त्रेसिव-तत्रसिम, त्रेसिम. त्रसिता. त्रसिष्यति. त्रस्यतु, त्रसतु. अत्रस्यत्, अत्रसत्. त्रस्येत्, त्रसेत्. त्रस्यात्. अत्रासीत्-अत्रासिष्टाम्. अत्रसीत्, अत्रसिष्टाम्. अत्रसिष्यत्। त्रस्यते-अत्रासि. त्रासयति-ते. तित्रसिषति-त्रसित्वा, सन्त्रस्य. त्रसितुम् ॥

त्रुट—छेदने। त्रुटति, त्रुट्यति. तुत्रोट. त्रुटिता. त्रुटिष्यति त्रुटतु, त्रुट्यतु. अत्रुटत्, अत्रुट्यत. त्रुटेत्, त्रुट्येत्. त्रुट्यात्. अत्रुटीत्. अत्रुटिष्यत्। त्रुट्यते; अत्रोटि. त्रोटयति. तुत्रुटिषति. त्रुटित्वा. त्रुटितुम् ॥

त्रैङ्—पालने। त्रायते तत्रे; तत्रिषे; तत्रे. त्राता. त्रास्यते. त्रायताम्. अत्रायत. त्रायेत-त्रासीष्ट. अत्रास्त-अत्रासाताम् अत्रासत; अत्रास्थाः-अत्रासाथाम्-अत्राध्वम्; अत्रासि-अत्रास्वहि-अत्रास्महि. अत्रास्यत। त्रायते; अत्रायि. त्रापयति. तित्रासते. त्रात्वा. त्रातुम् ॥

(ञि)त्वरा—सम्भ्रमे। त्वरते. तत्वरे. त्वरिता. त्वरिष्यते. त्वरताम्. अत्वरत. त्वरेत. त्वरिषीष्ट. अत्वरिष्ट. अत्वरिष्यत। त्वर्यते; अत्वरि, अत्वारि. त्वरयति. तित्वरिषते. त्वरित्वा. त्वरितुम् ॥

दण्ड—दण्डपातने। दण्डयति-ते. दण्डयाञ्चकार-चक्रे. अददण्डत्-त. दण्डयितासि-से। दण्डयते, अदण्डि. दण्डयित्वा. दण्डितुम् ॥

दद—दाने। ददते; ददसे; ददे. ददे. ददिता. ददिष्यते. ददताम्. अददत. ददेत. ददिषीष्ट. अददिष्ट. अददिष्यत। दद्यते; अदादि. दादयते. दिददिषते. ददित्वा. ददितुम् ॥

दध—धारणे। दधते. देधे. दधिता; दधितासे; दधिताहे. दधिष्यते. दधताम्; अदधत-दधेत. दधिषीष्ट. अदधिष्ट. अदधिष्यत। धध्यते-अदाधि. दाधयति. दिदधिषते. दधित्वा. दधितुम् ॥

दरिद्रा—दुर्गतौ। दरिद्राति-दरिद्रितः-दरिद्रति; दरिद्रासि-दरिद्रिथः-दरिद्रिथ; दरिद्रामि-दरिद्रिवः-दरिद्रिमः दरिद्राञ्चकार, ददरिद्रौ; दरिद्राञ्चकर्थ,

acharya.org

ददरिद्रिथ; दरिद्राञ्चकार, ददरिद्रौ. दरिद्रिता. दरिद्रिष्यति. दरिद्रातु. दरिद्रितात्. अदरिद्रात. दरिद्रियात्. दरिद्र्यात. अदरिद्रीत्-अदरिद्रासीत. अदरिद्रिष्यत। दरिद्र्यते; अदरिद्रायि, अदरिद्रि. दरिद्रयति. दिदरिद्रासति. दिदरिद्रिषति. दरिद्रित्वा ॥

दल—विशरणे। दलति. ददाल-देलतुः. दलिता. दलिष्यति. दलतु. अदलत्. दलेत्. दल्यात् अदालीत्-अदालिष्टाम्. अदलिष्यत् दाल्यते, दल्यते; अदालि, अदलि. दलयति. दिदलिषति. दलित्वा. दलितुम् ॥

दंश—दशने। दशति. ददंश; ददंशिथ, ददंष्ठ.दष्टा-दष्टारौ. दङ्क्ष्यति. दशतु. अदशत्. दशेत्. दश्यात्. दश्यास्ताम्. अदाङ्क्षीत् अदांष्टाम्-अदाङ्क्षुः; अदाङ्क्षीः-अदांष्टम्-अदांष्ट; अदाङ्क्षम्-अदाङ्क्ष्व-अदाङ्क्ष्म. अदङ्क्ष्यत-अदङ्क्ष्याम् ॥ दश्यते; अदंशि. दंशयति. दिदङ्क्षति. दष्ट्वा, उपदश्य. दंष्टुम् ॥

दशि—दशने दीप्तौ च। दंशयति-ते. अददंशत्-त. अदंशायिष्यत्-त। दंश्यते. दंष्ट्वा. दंष्टुम् ॥

दह—भस्मीकरणे। दहति. ददाह-देहतुः-देहुः; देहिथ, ददग्ध-देहथुः-देह; ददाह, ददह-देहिव देहिम. दग्धा-दग्धारौ. धक्ष्यति. दहतु. अदहत. दहेत. दह्यात्-दह्यास्ताम् अधाक्षीत्-अदाग्धाम्-अधाक्षुः; अधाक्षीः-अदाग्धम्-अदाग्ध; अधाक्ष्वम्-अधाक्ष्व-अधाक्ष्म. अधक्ष्यत। दह्यते-अदाहि. दाहयति-दिधक्षति. दग्ध्वा, सन्दह्य. दग्धुम् ॥

डुदाञ्—दाने। ददाति, दत्ते-दत्तः, ददाते-ददति, ददते; ददासि, दत्से-दत्थः, ददाथे-दत्थ, दद्ध्वे; ददामि, ददे-दद्वः, दद्वहे-दद्मः, दद्महे. ददौ, ददे-ददतुः, ददाते-ददुः, ददिरे; ददिथ-ददाथ, ददिषे-ददथुः, ददाथे-दद, ददिध्वे; ददौ, ददे-ददिव, ददिवहे-ददिमहे. दाता; दातासि, से. दास्यति, दास्यते. ददातु-दत्तात्, दत्ताम्-दत्ताम्, ददताम्-ददतु, ददताम्; देहि-दत्तात्, दत्स्व-

acharya.org

दत्तम्, ददाथाम्-दत्त, दद्ध्वम्; ददानि, ददै-ददाव, ददावहै-ददाम, ददामहै. अददतात्, अदत्त अदत्ताम्, अददाताम्-अददुः, अददत; अददाः, अदत्थाः-अदत्तम्, अददाथाम्-अदत्त, अदद्ध्वम्; अददाम्, अददि-अदद्व-अदद्वहि-अदद्म-अदद्महि. दद्यात्, ददीत-दद्याताम्, ददीयाताम्-दद्युः, ददीथाः-दद्यातम्, ददीयाथाम्-दद्यात, ददीध्वम्; दद्याम्, ददीय-दद्याव, ददीवहि-दद्याम, ददीमहि. देयात्, दासीष्ट. अदात्, अदित-अदाताम्, अदिषाताम्-अदुः, अदिषत; अदाः, अदिथाः; अदाम्, अदिषि. अदास्यत्, अदास्यत-अदास्यताम्, अदास्येताम्-अदास्यान्-अदास्यन्त । दीयते, अदायि. दापयति. दित्सति-ते. दत्त्वा, प्रदाय. दातुम्. आदत्ते. व्याददते ॥

दाण्—दाने । यच्छति. ददौ-ददतुः; ददिथ, ददाथ-ददथुः-ददौ; ददिव. दाता. दास्यति. यच्छतु. अयच्छत्. यच्छेत्. देयात्. अदात्-अदाताम्. अदुः. अदास्यत । दीयते-अदायि. दापयति. दित्सति. दत्वा. दातुम् ॥

दिवु—क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु । दीव्यति. दिदेव-दिदिवतुः-दिदिवुः देविता, देविष्यति. दीव्यतु, दीव्यतात्; दीव्य, दीव्यतात्. अदीव्यत. दीव्येत. दीव्यात्. अदेवीत्-अदेविष्टाम्-अदेविषुः. अदेविष्यत् । दीव्यते (क्रीडार्थे), अदेवि. देवयति. दिदेविषति, दुद्यूषति. देवित्वा, द्यूत्वा. देवितुम् ॥

दिश—अतिसर्जने । दिशति-ते. दिदेश, दिदिशे. देष्टा; देष्टासि-से, देक्ष्यति-ते. दिशतु, दिशताम्. अदिशत्-त. दिशेत्-त. दिश्यात्, दिक्षीष्ट. अदिक्षत्, अदिक्षत-अदिक्षताम्, अदिक्षाताम्; अदिक्षः. अदिक्षथाः; अदिक्षम्, अदिक्षि-अदिक्षाव, अदिक्षावहि. अदेक्ष्यत्, त । दिश्यते-अदेशि. देशयति-ते. दिदिक्षति ते. दिष्ट्वा. देष्टुम् ॥

acharya.org

दिह — उपचये । देग्धि, दिग्धे-दिग्धः, दिहाते दिहन्ति, दिहते, धेक्षि, धीक्षे-दिग्धः, दीहथे-दिग्ध, दिग्ध्वे; देह्मि, दिहे-दिह्वः, दिह्वहे-दिह्मः, दिह्महे. दिदेह, दिदिहे. देग्धा; देग्धासि, से. धेक्ष्यति-ते. देग्धु, दिग्धाम्; दिक्ष्व; देहै. अधेक्, ग्, अदिग्ध-अदिग्धां, अदिहाताम्-अदिहन्, अदिहत; अधेक्, ग्, अदिग्धां-अदिग्धं अदिहाथाम्; अदिग्ध, अदिग्ध्वत्; अदेहं, अदिहि-अदिह्व, अदिह्वहि-अदिह्म, अदिह्महि. दिह्यात्, दिहीत. दिह्यात्, धिक्षीष्ट. अधिक्षत्-अदिग्ध, अधिक्षत; अधिक्ष अधिक्षाः, अदिग्धौ. अधेक्ष्यत्-त । दिह्यते. देहयति. दिधिक्षति ॥

दीक्ष् — मौण्ड्य-इज्या - उपनयन - नियम - व्रत - आदेशेषु । दीक्षते. दिदीक्षे. दीक्षिता. दीक्षिष्यते. दीक्षिषीष्ट. अदीक्षिष्ट - अदीक्षिष्यत । दीक्ष्यते. दीक्षयति-ते. दिदीक्षिषते-दीक्षित्वा-दीक्षितुम् ॥

दीपी — दीप्तौ । दीप्यते. दिदीपे. दीपिता. दीपिष्यते. दीप्यताम्. अदीप्यत. दीप्येत. दीपिषीष्ट. अदीपि-अदीपिष्ट. अदीपिष्यत । दीप्यते-अदीपि. दीपयति-ते. दिदीपिषते. दीपितुम् ॥

दुष-वैकृत्ये । (लिट्) दुदोष. (लृट्) दोक्ष्यति. (लुट्) दोष्टा. (लङ्) अदोक्षत्. शेषं कुपधातुवत् । (णिजन्त) दूषयति, दोषयति. दुदुक्षति. दुष्ट्वा, सन्दुष्य. दोष्टुम् ॥

दुह — प्रपूरणे । दोग्धि, दुग्धे-दुग्धः, दुहाते-दुहन्ति, दुहते; धोक्षि, धुक्षे-दुग्धः, दुहाथे-दुग्ध, धुग्ध्वे, दोह्मि, दुहे-दुह्वः, दुह्वहे-दुह्मः, दुह्महे, दुदोह, दुदुहे, दोग्धा-सि-से, धोक्ष्यति-ते, दोग्धु-दुग्धात्, दुग्धाम्, दुग्धि-दुग्धात्, धुक्ष्व, दोहानि, दोहै. अधोक्, अदुग्ध, अधोक्, अदुग्धाः, अदोहम्, अदुहि. दुह्यात्, दुहीत. दुह्यात्, धुक्षीष्ट. अधुक्षत्, अदुग्ध, अधुक्षत, अधुग्धाः, अधुक्षथाः - अधुक्षाथाम् - अधुग्ध्वम्, अधुक्षध्वम्, अधुक्षि-अधुक्षावहि, अदुह्वहि-

acharya.org

अधुक्षामहि, अदुह्महि. अधोक्षत्, अधोक्ष्यत । दुह्यते; अदोहि. दोहयति. दुधुक्षति-ते. दुग्ध्वा. दोग्धुम् ॥

दूङ् – परितापे । दूयते. दुदुवे. दविता. दविष्यते. दूयताम्. अदूयत. दूयेत. दवीष्ट. अदविष्ट. अदविष्यत । दूयते - अदावि. दावयति-ते. दुदूषते. दूत्वा. दवितुम् ॥

दृङ्—आदरे । (आङ्पूर्वः) । आद्रियते. आदद्रे आदर्ता. आदरिष्यते. आद्रियताम् - आद्रियेताम्. आद्रियेत. आदृषीष्ट. आदृत-आदृषाताम्-आदृषत. आदरिष्यत । आद्रियते - आदारि. आदारयति - ते आदिदीर्षति. आदृत्य. आदर्तुम् ॥

दृप—हर्षमोहनयोः । दृप्यति. ददर्प. दर्पिता, द्रप्ता, दर्प्ता. दर्पिष्यति, द्रप्स्यति, दर्प्स्यति. दृप्यतु. अदृपत्. दृप्येत्. अदर्पीत्, अद्राप्सीत्, अदार्प्सीत्. अदृप्यत् । दृप्यते - अदर्पि. दर्पयति - ते. दिदर्पिषति, दिदृप्सति. दर्पित्वा, दृप्त्वा. दर्पितुम् - दर्प्तुम् ॥

दृशिर्—प्रेक्षणे । पश्यति. ददर्श - ददृशतुः - ददृशुः ; ददर्शिथ, दद्रष्ठ-ददृशथुः-ददृश ; ददर्श - ददृशिव - ददृशिम. द्रष्टा-द्रष्टारौ. द्रक्ष्यति. पश्यतु. अपश्यत्. पश्येत. दृश्यात्. अदर्शत. अद्राक्षीत् अद्राष्टाम्-अद्राक्षुः ; अद्राक्षीः-अद्राष्टम् - अद्राष्ट ; अद्राक्षम्-अद्राक्ष्व - अद्राक्ष्म. अद्रक्ष्यत । दृश्यते, अदर्शि. दर्शयति ते. दिदृक्षते. दृष्ट्वा, सन्दृश्य. द्रष्टुम् ॥

देङ्—रक्षणे । दयते. दिग्ये - दिग्याते-दिग्यिरे. दाता. दास्यते. दयताम्. अदयत. अदयेत. दासीष्ट. अदित-अदिषाताम् - अदिषत-अदास्यत । दीयते. दापयति. दित्सते प्रदाय.

दो—अवखण्डने । द्यति. ददौ ; ददिथ, ददाथ. दाता. दास्यति. द्यतु. अद्यत्. द्येत देयात्. अदात्. अदास्यत् । दीयते-अदायि. दापयति. दित्सति. दित्वा, अवदाय.

acharya.org

द्युत—दीप्तौ । द्योतते. दिद्युते - दिद्युताते - दिद्युतिरे ; दिद्युतिषे-दिद्युताथे-दिद्युतिध्वे ; दिद्युते दिद्युतिवहे - दिद्युतिमहे. द्योतिता. द्योतिष्यते. द्योतताम्. अद्योतत. द्योतेत. द्योतिषीष्ट. अद्युतत् ; अद्योतिष्ट (लुङि रूपान्तरम्) अद्योतिष्यत । द्युत्यते. द्योतयति. दिद्युतिषते, दिद्योतिषते द्युतित्वा, द्योतित्वा. द्योतितुम् ॥

द्रु-गतौ—द्रवति. दुद्राव-दुद्रुवतुः-दुद्रुवुः ; दुद्रोथ-दुद्रुवथुः ; दुद्राव, दुद्रुव. द्रोता. द्रोष्यति. द्रवतु. अद्रवत्. द्रवेत्. द्रुयात अदुद्रुवत् अद्रोष्यत् । द्रूयते दुद्रूषति ॥

द्रुह—जिघांसायाम् । द्रुह्यति दुद्रोह ; दुद्रोहिथ, दुद्रोग्ध, द्रुद्रोढ—दुद्रुहथुः ; दुद्रुहिव, दुद्रुह-दु-द्रुहिम, दुद्रुह्म. द्रोहिता, द्रोग्धा, द्रोढा. द्रोहिष्यति, ध्रोक्ष्यति द्रुह्यतु. अद्रुह्यत्. द्रुह्येत. द्रुह्यात्. अद्रुहत्. अद्रोहिष्यत्, अध्रोक्ष्यत । द्रुह्यते द्रोहयति. दुद्रोहिषति, दुद्रुहिषति, दुध्रुक्षति द्रुहित्वा, द्रोहित्वा, द्रुग्ध्वा, द्रूढ्वा द्रोहितुम्, द्रोग्धुम्, द्रोढुम् । अभिद्रुह्यति ॥

